चौखम्बा स्तोत्र ग्रन्थमाला
१७

श्रीविष्णुसहस्रनामस्तोत्रम्

(नामावली सहितम्)

चौखम्बा संस्कृत प्रतिष्ठान
३८, यू.ए., बंगलो रोड, जवाहर नगर, दिल्ली

मूल्य १५.००

॥श्रीः॥

॥ श्रीविष्णुसहस्रनामस्तोत्रम् ॥

अष्टोत्तरनामावलिसंवलितम्

चौखम्बा संस्कृत प्रतिष्ठान

३८ यू ए बंगलो रोड, जवाहरनगर

दिल्ली ११०००७

||श्रीः ||

|| श्रीविष्णुसहस्रनामस्तोत्रम् ||

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥ १

व्यासं वसिष्ठनप्तारं शक्तेः पौत्रमकल्मषम् ।
पराशरात्मजं वन्दे शुकतातं तपोनिधिम् ॥ २

व्यासाय विष्णुरूपाय व्यासरूपाय विष्णवे ।
नमो वै ब्रह्मनिधये वासिष्ठाय नमो नमः ॥ ३

अविकाराय शुद्धाय नित्याय परमात्मने ।
सदैकरूपरूपाय विष्णवे सर्वजिष्णवे ॥ ४

यस्य स्यरणमात्रेण जन्मसंसारबन्धनात् ।
विमुच्यते नमस्तस्मै विष्णवे प्रभविष्णवे ॥ ५

ओं नमो विष्णवे प्रभविष्णवे ।

श्रीवैशम्पायन उवाचः–

श्रुत्वा धर्मानशेषेण पावनानि च सर्वशः ।
युधिष्ठिरः शान्तनवं पुनरेवाभ्यभाषत ॥ ६

युधिष्ठिर उवाचः–

किमेकं दैवतं लोके किं वाऽप्येकं परायणम् ।
स्तुवन्तः कं कमर्चन्तः प्राप्नुयुर्मानवाः शुभम् ॥ ७

को धर्मः सर्वधर्माणां भवतः परमो मतः ।
किं जपन्मुच्यते जन्तुर्जन्मसंसारबन्धनात् ॥ ८

श्रीभीष्म उवाच –

जगत्प्रभुं देवदेवमनन्तं पुरुषोत्तमम् ।
स्तुवन्नामसहस्रेण पुरुषः सततोत्थितः ॥ ९

तमेव चार्चयन्नित्यं भक्त्या पुरुषमव्ययम् ।
ध्यायन्स्तुवन्नमस्यंश्च यजमानस्तमेव च ॥ १०

अनादिनिधनं विष्णुं सर्वलोकमहेश्वरम् ।
लोकाध्यक्षं स्तुवन्नित्यं सर्वदुःखातिगो भवेत् ॥ ११

ब्रह्मण्यं सर्वधर्मज्ञं लोकानां कीर्तिवर्धनम् ।

लोकनाथं महद्भूतं सर्वभूतभवोद्भवम् ॥ १२

एष मे सर्वधर्माणां धर्मोऽधिकतमो मतः ।
यद्भक्त्या पुण्डरीकाक्षं स्तवैरर्चेन्नरः सदा ॥ १३

परमं यो महत्तेजः परमं यो महत्तपः ।
परमं यो महद्ब्रह्म परमं यः परायणम् ॥ १४

पवित्राणां पवित्रं यो मङ्गलानां च मङ्गलम् ।
दैवतं देवतानां च भूतानां योऽव्ययः पिता ॥ १५

यतः सर्वाणि भूतानि भवन्त्यादियुगागमे ।
यस्मिंश्च प्रलयं यान्ति पुनरेव युगक्षये ॥ १६

तस्य लोकप्रधानस्य जगन्नाथस्य भूपते ।
विष्णोर्नामसहस्त्रं मे शृणु पापभयापहम् ॥ १७

यानि नामानि गौणानि विख्यातानि महात्मनः
ऋषिभिः परिगीतानि तानि वक्ष्यामि भूपते ॥ १८

ऋषिर्नाम्नां सहस्त्रस्य वेदव्यासो महामुनिः ।
छन्दोऽनुष्टुप्तथा देवो भगवान्देवकीसुतः ॥ १९

अमृतांशूद्भवो बीजं शक्तिर्देवकिनन्दनः ।
त्रिसामा हृदयं तस्य शान्त्यर्थे विनियुज्यते ॥ २०

विष्णुं जिष्णुं महाविष्णुं प्रभविष्णुं महेश्वरम् ।
अनेकरूपदैत्यान्तं नमामि पुरुषोत्तमम् ॥ २१

अस्य श्रीविष्णोर्दिव्यसहस्रनामस्तोत्रमहामन्त्रस्य । श्रीवेदव्यासो भगवान् ऋषिः । अनुष्टुप् छन्दः । श्रीमहाविष्णुः परमात्मा श्रीमन्नारायणो देवता । अमृतांशूद्भवो भानुरिति बीजम् ।देवकीनन्दनः स्रष्टेति शक्तिः । त्रिसामा सामगः सामेति हृदयम् । शङ्खभृन्नन्दकी चक्रीति कीलकम् । शार्ङ्गधन्वा गदाधर इत्यस्त्रम् । रथाङ्गपाणिरक्षोभ्य इति कवचम् । उद्भवः क्षोभणो देव इति परमो मन्त्रः । श्रीमहाविष्णुप्रीत्यर्थे जपे विनियोगः ॥

विश्वं विष्णुर्वषट्कार इत्यंगुष्ठाभ्यां नमः । अमृतांशूद्भवो भानुरिति तर्जनीभ्यां नमः । ब्रह्मण्यो ब्रह्मकृद्ब्रह्मेति मध्यमाभ्यां नमः । सुवर्णबिन्दुरक्षो इत्यनामिकाभ्यां नमः । निमिषोऽनिमिषः स्रग्वीति कनिष्ठिकाभ्यां नमः । रथाङ्गपाणिरक्षोभ्य इति करतलकरपृष्ठाभ्यां नमः । सुव्रतः सुमुखः सूक्ष्मेति ज्ञानाय हृदयाय नमः । सहस्रमूर्धा

विश्वात्मेति ऐश्वर्याय शिरसे स्वाहा । सहस्रार्चिः सप्तजिह्वेति शक्त्यै शिखायै वषट्
त्रिसामा सामगः सामेति बलाय कवचाय हुम् । रथाङ्गपाणिरक्षोभ्य इति तेजसे
नेत्रत्रयाय वौषट् । शार्ङ्गधन्वा गदाधर इति वीर्याय अस्त्राय फट् । ऋतुः सुदर्शनः काल
इति भूर्भुवः सुवरोम् दति दिग्बन्धः ॥

ध्यानम् –

श्रीरोदन्वत्प्रदेशे शुचिमणिविलसत्सैकते मौक्तिकानां
मालाक्लृप्तासनस्थः स्फटिकमणिनिभैर्मौक्तिकैर्मण्डिताङ्गः ।
शुभ्रैरभ्रैरदभ्रैरुपरिविरचितैर्मुक्तपीयूषवर्षै–
रानन्दी नः पुनीयादरिनलिनगदाशङ्खपाणिर्मुकुन्दः ॥
भूः पादौ यस्य नाभिर्वियदसुरनिलश्चन्द्रसूर्यौ च नेत्रे
कर्णावाशाः शिरो द्यौर्मुखमपि दहनो यस्य वास्तेयमब्धिः ।

अन्तस्स्थं यस्य विश्वं सुरनरखगगोभोगिगन्धर्वदैत्यै-
श्चित्रं रंरम्यते तं त्रिभुवनवपुषं विष्णुमीशं नमामि ॥
शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं
विश्वाकारं गगनसदृशं मेघवर्ण शुभाङ्गम् ।
लक्ष्मीकान्तं कमलनयनं योगिहृद्ध्यानगम्यं
वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम् ॥
मेघश्यामं पीतकौशेयवासं
श्रीवत्साङ्कं कौस्तुभोद्भासिताङ्गम् ।
पुण्योपेतं पुण्डरीकायताक्षं

विष्णुं वन्दे सर्वलोकैकनाथम् ॥
सशङ्खचक्रं सकिरीटकुण्डलं
सपीतवस्त्रं सरसीरुहेक्षणम् ।
सहारवक्षः स्थलशोभिकौस्तुभं
नमामि विष्णुं शिरसा चतुर्भुजम् ॥
छायायां पारिजातस्य हेमसिंहासनोपरि ।
आसीनमम्बुदश्याममायताक्षमलंकृतम् ॥
चन्द्राननं चतुर्बाहुं श्रीवत्साङ्कितवक्षसम् ।
रुक्मिणीसत्यभाभ्यां सहितं कृष्णमाश्रये ॥
ओं विश्वस्मै नमः ॥

विश्वं विष्णुर्वषट्कारो भूतभव्यभवत्प्रभुः ।
भूतकृद्भृद्भूतभृद्भावो भूतात्मा भूतभावनः ॥ १
पूतात्मा परमात्मा च मुक्तानां परमा गतिः ।
अव्ययः पुरुषः साक्षी क्षेत्रज्ञोऽक्षर एव च ॥ २
योगो योगविदां नेता प्रधानपुरुषेश्वरः ।
नारसिंहवपुः श्रीमान् केशवः पुरुषोत्तमः ॥ ३
सर्वः शर्वः शिवः स्थाणुर्भूतादिर्निधिरव्ययः ।
संभवो भावनो भर्ता प्रभवः प्रभुरीश्वरः ॥ ४
स्वयंभूः शंभुरादित्यः पुष्कराक्षो महास्वनः ।

अनादिनिधनो धाता विधाता धातुरुत्तमः ॥ ५
अप्रमेयो हृषीकेशः पद्मनाभोऽमरप्रभुः ।
विश्वकर्मा मनुस्त्वष्टा स्थविष्ठः स्थविरो ध्रुवः ॥ ६
अग्राह्यः शाश्वतः कृष्णो लोहिताक्षः प्रतर्दनः ।
प्रभूतस्त्रिककुब्धाम पवित्रं मङ्गलं परम् ॥ ७
ईशानः प्राणदः प्राणो ज्येष्ठः श्रेष्ठः प्रजापतिः ।
हिरण्यगर्भो भूगर्भो माधवो मधुसूदनः ॥ ८
ईश्वरो विक्रमी धन्वी मेधावी विक्रमः क्रमः ।
अनुत्तमो दुराधर्षः कृतज्ञः कृतिरात्मवान् ॥ ९
सुरेशः शरणं शर्म विश्वरेताः प्रजाभवः ।

अहः संवत्सरो व्यालः प्रत्ययः सर्वदर्शनः ॥ १०

अजः सर्वेश्वरः सिद्धः सिद्धिः सर्वादिरच्युतः ।

वृषाकपिरमेयात्मा सर्वयोगविनिःसृतः ॥ ११

वसुर्वसुमनाः सत्यः समात्माऽसंमितः समः ।

अमोघः पुण्डरीकाक्षो वृषकर्मा वृषाकृतिः ॥ १२

रुद्रो बहु शिरा बभ्रुर्विश्वयोनिः शुचिश्रवाः ।

अमृतः शाश्वतस्थाणुर्वरारोहो महातपाः ॥ १३

सर्वगः सर्वविद्भानुर्विष्वक्सेनो जनार्दनः ।

वेदो वेदविदव्यङ्गो वेदाङ्गो वेदवित्कविः ॥ १४

लोकाध्यक्षः सुराध्यक्षो धर्माध्यक्षः कृताकृतः ।
चतुरात्मा चतुर्व्यूहश्चतुर्दंष्ट्रश्चतुर्भुजः ॥ १५

भ्राजिष्णुर्भोजनं भोक्ता सहिष्णुर्जगदादिजः ।
अनघो विजयो जेता विश्वयोनिः पुनर्वसुः ॥ १६

उपेन्द्रो वामनः प्रांशुरमोघः शुचिरूर्जितः ।
अतीन्द्रः संग्रहः सर्गो धृतात्मा नियमो यमः ॥ १७

वेद्यो वैद्यः सदायोगी वीरहा माधवो मधुः ।
अतीन्द्रियो महामायो महोत्साहो महाबलः ॥ १८

महाबुद्धिर्महावीर्यो महाशक्तिर्महाद्युतिः ।
अनिर्देश्यवपुः श्रीमानमेयात्मा महाद्रिधृक् ॥ १९

महेष्वासो महीभर्ता श्रीनिवासः सतां गतिः ।
अनिरुद्धः सुरानन्दो गोविन्दो गोविदां पतिः ॥ २०
मरीचिर्दमनो हंसः सुपर्णो भुजगोत्तमः ।
हिरण्यनाभः सुतपाः पद्मनाभः प्रजापतिः ॥ २१
अमृत्युः सर्वदृक्सिंहः संधाता संधिमान् स्थिरः ।
अजो दुर्मर्षणः शास्ता विश्रुतात्मा सुरारिहा ॥ २२
गुरुर्गुरुतमो धाम सत्यः ।पराक्रमः ।
निमिषोऽनिमिषः स्रग्वी वाचस्पतिरुदारधीः ॥ २३
अग्रणीर्ग्रामणीः श्रीमान् न्यायो नेता समीरणः ।

सहस्रमूर्धा विश्वात्मा सहस्राक्षः सहस्रपात् ॥ २४
आवर्तनो निवृत्तात्मा संवृतः संप्रमर्दनः ।
अहः संवर्तको वह्निरनिलो धरणीधरः ॥ २५
सुप्रसादः प्रसन्नात्मा विश्वधृग्विश्वभुग्विभुः ।
सत्कर्ता सत्कृतः साधुर्जह्नुर्नारायणो नरः ॥ २६
असंख्येयोऽप्रमेयात्मा विशिष्टः शिष्टकृच्छुचिः ।
सिद्धार्थः सिद्धसंकल्पः सिद्धिदः सिद्धिसाधनः ॥ २७
वृषाही वृषभो विष्णुर्वृषपर्वा वृषोदरः ।
वर्धनो वर्धमानश्च विविक्तः श्रुतिसागरः ॥ २८
सुभुजो दुर्धरो वाग्मी महेन्द्रो वसुदो वसुः ।

नैकरूपो बृहद्रूपः शिपिविष्टः प्रकाशनः ॥ २९
ओजस्तेजोद्युतिधरः प्रकाशात्मा प्रतापनः ।
ऋद्धः स्पष्टाक्षरो मन्त्रश्चन्द्रांशुर्भास्करद्युतिः ॥ ३०
अमृतांशूद्भवो भानुः शशबिन्दुः सुरेश्वरः ।
औषधं जगतः सेतुः सत्यधर्मपराक्रमः ॥ ३१
भूतभव्यभवन्नाथः पवनः पावनोऽनलः ।
कामहा कामकृत्कान्तः कामः कामप्रदः प्रभुः ॥ ३२
युगादिकृद्युगावर्तो नैकमायो महाशनः ।
अदृश्यो व्यक्तरूपश्च सहस्रजिदनन्तजित् ॥ ३३

इष्टोऽविशिष्टः शिष्टेष्टः शिखण्डी नहुषो वृषः ।
क्रोधहा क्रोधकृत्कर्ता विश्वबाहुर्महीधरः ॥ ३४

अच्युतः प्रथितः प्राणः प्राणदो वासवानुजः ।
अपांनिधिरधिष्ठानमप्रमत्तः प्रतिष्ठितः ॥ ३५

स्कन्दः स्कन्दधरो धुर्यो वरदो वायुवाहनः ।
वासुदेवो बृहद्भानुरादिदेवः पुरन्दरः ॥ ३६

अशोकस्तारणस्तारः शूरः शौरिर्जनेश्वरः ।
अनुकूलः शतावर्तः पद्मी पद्मनिभेक्षणः ॥ ३७

पद्मनाभोऽरविन्दाक्षः पद्मगर्भः शरीरभृत् ।
महर्द्धिर्ऋद्धो वृद्धात्मा महाक्षो गरुडध्वजः ॥ ३८

अतुलः शरभो भीमः समयज्ञो हविर्हरिः ।
सर्वलक्षणलक्षण्यो लक्ष्मीवान् समितिञ्जयः ॥ ३९
विक्षरो रोहितो मार्गो हेतुर्दामोदरः सहः ।
महीधरो महाभागो वेगवानमिताशनः ॥ ४०
उद्भवः क्षोभंणो देवः श्रीगर्भः परमेश्वरः ।
करणं कारणं कर्ता विकर्ता गहनो गुहः ॥ ४१
व्यवसायो व्यवस्थानः संस्थानः स्थानदो ध्रुवः ।
परर्द्धिः परमस्पष्टस्तुष्टः पुष्टः शुभेक्षणः ॥ ४२
रामो विरामो विरजो मार्गो नेयो नयोऽनयः ।

वीरःशक्तिमतां श्रेष्ठो धर्मो धर्मविदुत्तमः ॥ ४३ ॥
वैकुण्ठः पुरुषः प्राणः प्राणदः प्रणवः पृथुः ।
हिरण्यगर्भः शत्रुघ्नो व्याप्तो वायुरधोक्षजः ॥ ४४ ॥
ऋतुः सुदर्शनः कालः परमेष्ठी परिग्रहः ।
उग्रः संवत्सरो दक्षो विश्रामो विश्वदक्षिणः ॥ ४५ ॥
विस्तारः स्थावरस्थाणुः प्रमाणं बीजमव्ययम् ।
अर्थोऽनर्थो महाकोशो महाभोगो महाधनः ॥ ४६ ॥
अनिर्विण्णः स्थविष्ठोऽभूर्धर्मयूपो महामखः ।
नक्षत्रनेमिर्नक्षत्री क्षमः क्षामः समीहनः ॥ ४७ ॥
यज्ञ इज्यो महेज्यश्च क्रतुः सत्रं सतां गतिः ।

सर्वदर्शी विमुक्तात्मा सर्वज्ञो ज्ञानमुत्तमम् ॥ ४८ ॥
सुव्रतः सुमुखः सूक्ष्मः सुघोषः सुखदः सुहृत् ।
मनोहरो जितक्रोधो वीरबाहुर्विदारणः ॥४९ ॥
स्वापनः स्ववशो व्यापी नैकात्मा नैककर्मकृत् ।
वत्सरो वत्सलो वत्सी रत्नगर्भो धनेश्वरः ॥ ५० ॥
धर्मगुब्धर्मकृद्धर्मी सदसत्क्षरमक्षरम् ।
अविज्ञाता सहस्रांशुर्विधाता कृतलक्षणः ॥ ५१ ॥
गभस्तिनेमिः सत्त्वस्थः सिंहो भूतमहेश्वरः ।
आदिदेवो महादेवो देवेशो देवभृद्गुरुः ॥ ५२ ॥

उत्तरो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः ।
शरीरभूतभृद्भोक्ता कपीन्द्रो भूरिदक्षिणः ॥ ५३

सोमपोऽमृतपः सोमः पुरुजित्पुरुसत्तमः ।
विनयो जयः सत्यसन्धो दाशार्हः सात्त्वतां पतिः । ५४

जीवो विनयितासाक्षी मुकुन्दोऽमितविक्रमः ।
अम्भोनिधिरनन्तात्मा महोदधिशयोऽन्तकः ॥ ५५

अजो महार्हः स्वाभाव्यो जितामित्रः प्रमोदनः ।
आनन्दो नन्दनो नन्दः सत्यधर्मा त्रिविक्रमः ॥ ५६

महर्षिः कपिलाचार्यः कृतज्ञो मेदिनीपतिः ।
त्रिपदास्त्रिदशाध्यक्षो महाशृङ्गः कृतान्तकृत् ॥ ५७

महावराहो गोविन्दः सुषेणः कनकाङ्गदी ।
गुह्यो गभीरो गहनो गुप्तश्चक्रगदाधरः ॥ ५८

वेधाः स्वाङ्गोऽजितः कृष्णो दृढः सङ्कर्षणोऽच्युतः ।
वरुणो वारुणो वृक्षः पुष्कराक्षो महामनाः ॥ ५९

भगवान् भगहाऽऽनन्दी वनमाली हलायुधः ।
आदित्यो ज्योतिरादित्यः सहिष्णुर्गतिसत्तमः ॥ ६०

सुधन्वा खण्डपरशुर्दारुणो द्रविणप्रदः ।
दिवःस्पृक् सर्वदृग्व्यासो वाचस्पतिरयोनिजः ॥ ६१

त्रिसामा सामगः साम निर्वाणं भेषजं भिषक् ।

संन्यासकृच्छमः शान्तो निष्ठा शान्तिः परायणम् ॥ ६२

शुभाङ्गःशान्तिदः स्रष्टा कुमुदः कुवलेशयः ।

गोहितो गोपतिर्गोप्ता वृषभाक्षो वृषप्रियः ॥ ६३

अनिवर्ती निवृत्तात्मा संक्षेप्ता क्षेमकृच्छिवः ।

श्रीवत्सवक्षाः श्रीवासः श्रीपतिः श्रीमतां वरः ॥ ६४

श्रीदः श्रीशः श्रीनिवासः श्रीनिधिः श्रीविभावनः ।

श्रीधरः श्रीकरः श्रेयः श्रीमाल्लोकत्रयाश्रयः ॥ ६५

स्वक्षः स्वङ्गः शतानन्दो नन्दिर्ज्योतिर्गणेश्वरः ।

विजितात्माऽविधेयात्मा सत्कीर्तिश्छिन्नसंशयः ॥ ६६

उदीर्णः सर्वतश्चक्षुरनीशः शाश्वतस्थिरः ।

भूशयो भूषणो भूतिर्विशोकः शोकनाशनः ॥ ६७

अर्चिष्मानर्चितः कुम्भो विशुद्धात्मा विशोधनः ।

अनिरुद्धोऽप्रतिरथः प्रद्युम्नोऽमितविक्रमः ॥ ६८

कालनेमिनिहा वीरः शौरिः शूरजनेश्वरः ।

त्रिलोकात्मा त्रिलोकेशः केशवः केशिहा हरिः ॥ ६९

कामदेवः कामपालः कामी कान्तः कृतागमः ।

अनिर्देश्यवपुर्विष्णुर्वीरोऽनन्तो धनञ्जयः ॥ ७०

ब्रह्मण्यो ब्रह्मकृद्ब्रह्मा ब्रह्म ब्रह्मविवर्धनः ।

ब्रह्मविद्ब्राह्मणो ब्रह्मी ब्रह्मज्ञो ब्राह्मणप्रियः ॥ ७१

महाक्रमो महाकर्मा महातेजा महोरगः ।
महाक्रतुर्महायज्वा महायज्ञो महाहविः ॥ ७२

स्तव्यः स्तवप्रियः स्तोत्रं स्तुतिः स्तोता रणप्रियः ।
पूर्णः पूरयिता पुण्यः पुण्यकीर्तिरनामयः ॥ ७३

मनोजवस्तीर्थकरो वसुरेता वसुप्रदः ।
वसुप्रदो वासुदेवो वसुर्वसुमना हविः ॥ ७४

सद्गतिः सत्कृतिः सत्ता सद्भूतिः सत्परायणः ।
शूरसेनो यदुश्रेष्ठः सन्निवासः सुयामुनः ॥ ७५

भूतावासो वासुदेवः सर्वासुनिलयोऽनलः ।
दर्पहा दर्पदो दृप्तो दुर्धरोऽथापराजितः ॥ ७६

विश्वमूर्तिर्महामूर्तिर्दिप्तमूर्तिरमूर्तिमान् ।
अनेकमूर्तिरव्यक्तः शतमूर्ति : शताननः ॥ ७७
एको नैकः सवः कः किं यत्तत्पदमनुत्तमम् ।
लोकबन्धुर्लोकनाथो माधवो भक्तवत्सलः ॥ ७८
सुवर्णवर्णो हेमाङ्गो वराङ्गश्चन्दनाङ्गदी ।
वीरहा विषमः शून्यो धृताशीरचलश्चलः ॥ ७९
अमानी मानदो मान्यो लोकस्वामी त्रिलोकधृक् ।
सुमेधा मेधजो धन्यः सत्यमेधा धराधरः ॥ ८०
तेजोवृषो द्युतिधरः सर्वशस्त्रभृतां वरः ।

प्रग्रहो निग्रहो व्यग्रो नैकशृङ्गो गदाग्रजः ॥ ८१
चतुर्मूर्तिश्चतुर्बाहुश्चतुर्व्यूहश्चतुर्गतिः ।
चतुरात्मा चतुर्भावश्चतुर्वेदविदेकपात् ॥ ८२
समावर्तोऽनिवृत्तात्मा दुर्जयो दुरतिक्रमः ।
दुर्लभो दुर्गमो दुर्गो दुरावासो दुरारिहा ॥ ८३
शुभाङ्गो लोकसारङ्गः सुतन्तुस्तन्तुवर्धनः ।
इन्द्रकर्मा महाकर्मा कृतकर्मा कृतागमः ॥ ८४
उद्भवः सुन्दरः सुन्दो रत्ननाभः सुलोचनः ।
अर्को वाजसनः शृङ्गी जयन्तः सर्वविज्जयी ॥ ८५

सुवर्णबिन्दुरक्षोभ्यः सर्ववागीश्वरेश्वरः ।

महाह्वदो महागर्तो महाभूतो महानिधिः ॥ ८६

कुमुदः कुन्दरः कुन्दः पर्जन्यः पावनोऽनिलः ।
अमृताशोऽमृतवपुः सर्वज्ञः सर्वतोमुखः ॥ ८७

सुलभः सुव्रतः सिद्धः शत्रुजिच्छत्रुतापनः ।
न्यग्रोधोदुम्बरोऽश्वत्थश्चाणूरान्ध्रनिषूदनः ॥ ८८

सहस्रार्चिः सप्तजिह्वः सप्तैधाः सप्तवाहनः ।
अमूर्तिरनघोऽचिन्त्यो भयकृद्भयनाशनः ॥ ८९

अणुर्बृहत्कृशः स्थूलो गुणभृन्निर्गुणो महान् ।

अधृतः स्वधृतः स्वास्यः प्राग्वंशो वंशवर्धनः ॥ ९०

भारभृत्कथितो योगी योगीशः सर्वकामदः ।
आश्रमः श्रमणः क्षामः सुपर्णो वायुवाहनः ॥ ९१

धनुर्धरो धनुर्वेदो दण्डो दमयिता दमः ।
अपराजितः सर्वसहो नियन्ताऽनियमोऽयमः ॥ ९२

सत्त्ववान्सात्त्विकः सत्यः सत्यधर्मपरायणः ।
अभिप्रायः प्रियार्होर्हः प्रियकृत्प्रीतिवर्धनः ॥ ९३

विहायसगतिर्ज्योतिः सुरुचिर्हुतभुग्विभुः ।
रविर्विरोचनः सूर्यः सविता रविलोचनः ॥ ९४

अनन्तो हुतभुग्भोक्ता सुखदो नैकजोऽग्रजः ।

अनिर्विण्णःसदामर्षी लोकाधिष्ठानमद्भुतः ॥ ९५

सनात्सनातनतमः कपिलः कपिरप्ययः ।
स्वस्तिदः स्वस्तिकृत्स्वस्ति स्वस्तिभुस्वस्तिदक्षिणः ॥ ९६

अरौद्रः कुण्डली चक्री विक्रम्यूर्जितशासनः ।
शब्दातिगः शब्दसहः शिशिरः शर्वरीकरः ॥ ९७

अक्रूरः पेशलो दक्षो दक्षिणः क्षमिणां वरः ।
विद्वत्तमो वीतभयः पुण्यश्रवणकीर्तनः ॥ ९८

उत्तारणो दुष्कृतिहा पुण्यो दुःस्वप्ननाशनः ।
वीरहा रक्षणः सन्तो जीवनः पर्यवस्थितः ॥ ९९

अनन्तरूपोऽनन्तश्रीर्जितमन्युर्भयापहः ।

चतुरुो गभीरात्मा विदिशो व्यादिशो दिशः ॥ १००
अनादिर्भूर्भुवो लक्ष्मीः सुवीरो रुचिराङ्गदः ।
जननो जनजन्मादिर्भीभो भीमपराक्रमः ॥ १०१
आधारनिलयोऽधाता पुष्पहासः प्रजागरः ।
ऊर्ध्वगः सत्पथाचारः प्राणदः प्रणवः पणः ॥ १०२
प्रमाणं प्राणनिलयः प्राणभृत्प्राणजीवनः ।
तत्त्वं तत्त्वविदेकात्मा जन्ममृत्युजरातिगः ॥ १०३
भूर्भुवःस्वस्तरुस्तारः सविता प्रपितामहः ।
यज्ञो यज्ञपतिर्यज्वा यज्ञाङ्गो यज्ञवाहनः ॥ १०४

यज्ञभृद्यज्ञकृद्यज्ञी यज्ञभुग्यज्ञसाधनः ।

यज्ञान्तकृद्यज्ञगुह्यमन्नमन्नाद एव च ॥ १०५

आत्मयोनिः स्वयञ्जातो वैखानः सामगायनः ।

देवकीनन्दनः स्रष्टा क्षितीशः पापनाशनः ॥ १०६

शङ्खभृन्नन्दकी चक्री शार्ङ्गधन्वा गदाधरः ।

रथाङ्गपाणिरक्षोभ्यः सर्वप्रहरणायुधः ॥ १०७

सर्वप्रहरणायुध ओं नम इति ।

वनमाली गदी शार्ङ्गी शङ्खी चक्री च नन्दकी ।

श्रीमन्नारायणो विष्णुर्वासुदेवोऽभिरक्षतु ॥ १

श्रीवासुदेवोऽभिरक्षत्वों नम इति ॥

इतीदं कीर्तनीयस्य केशवस्य महात्मनः ।
नाम्नां सहस्त्रं दिव्यानामशेषेण प्रकीर्तितम् ॥ २

य इदं शृणुयान्नित्यं यश्चापि परिकीर्तयेत् ।
नाशुभं प्राप्नुयात्किञ्चित्सोमुत्रेह च मानवः ॥ ३

वेदान्तगो ब्राह्मणः स्यात्क्षत्रियो विजयी भवेत् ।
वैश्यो धनसमृद्धः स्याच्छूद्रः सुखमवाप्नुयात् ॥ ४

धर्मार्थी प्राप्नुयाद्धर्ममर्थार्थी चार्थमाप्नुयात् ।
कामानवाप्नुयात्कामी प्रजार्थी चाप्नुयात्प्रजाः ॥ ५

भक्तिमान्यः सदोत्थाय शुचिस्तद्गतमानसः ।
सहस्त्रं वासुदेवस्य नाम्नामेतत्प्रकीर्तयेत् ॥ ६

यशः प्राप्नोति विपुलं यातिन प्राधान्यमेव च ।
अचलां श्रियमाप्नोति श्रेयश्चाप्नोत्यनुत्तमम् ॥ ७

न भयं क्वचिदाप्नोति वीर्यं तेजश्च विन्दति ।
भवत्यरोगो द्युतिमान्बलरूपगुणान्वितः ॥ ८

रोगार्तो मुच्यते रोगाद्बद्धो मुच्येत बन्धनात् ।
भयान्मुच्येत भीतस्तु मुच्येताषन्न आपदः ॥ ९

दुर्गाण्यतितरत्याशु पुरुषः पुरुषोत्तमम् ।
स्तुवन्नामसहस्रेण नित्यं भक्तिसमन्वितः ॥ १०

वासुदेवाश्रयो मर्त्यो वासुदेवपरायणः ।

सर्वपापविशुद्धात्मा याति ब्रह्म सनातनम् ॥ ११

न वासुदेवभक्तानामशुभं विद्यते क्वचित् ।
जन्ममृत्युजराव्याधिभयं नैवोपजायते ॥ १२

इमं स्तवमधीयानः श्रद्धाभक्तिसमन्वितः ।
युज्येतात्मसुखक्षान्तिश्रीधृतिस्मृतिकीर्तिभिः ॥ १३

न क्रोधो न च मात्सर्थं न लेभो नाशुभा मतिः ।
भवन्ति कृतपुण्यानां भक्तानां पुरुषोत्तमे ॥ १४

द्यौः सचन्द्रार्कनक्षत्रा खं दिशो भूर्महोदधिः ।
वासुदेवस्य वीर्येण विधृतानि महात्मनः ॥ १५

ससुरासुरगन्धर्वं सयक्षोरगराक्षसम् ।

जगद्वशे वर्ततेदं कृष्णस्य सचराचरम् ॥ १६

इन्द्रियाणि मनो बुद्धिः सत्त्वं तेजो बलं धृतिः ।
वासुदेवात्मकान्याहुः क्षेत्रं क्षेत्रज्ञ एव च ॥ १७

सर्वागमानामाचारः प्रथमं परिकल्पते ।
आचारप्रभवो धर्मो धर्मस्य प्रभुरच्युतः ॥ १८

ऋषयः पितरो देवा महाभूतानि धातवः ।
जङ्गमाजङ्गमं चेदं जगन्नारायणोद्भवम् ॥ १९

योगो ज्ञानं तथा सांख्यं विद्याः शिल्पादिकर्म च ।
वेदाः शास्त्राणि विज्ञानमेतत्सर्वं जनार्दनात् ॥ २०

एको विष्णुर्महद्भूतं पृथग्भूतान्यनेकशः ।
त्रीन्लोकान्व्याप्य भूतात्मा भुङ्क्ते विश्वभुगव्ययः ॥ २१

इमं स्तवं भगवतो विष्णोर्व्यासेन कीर्तितम् ।
पठेद्य इच्छेत्पुरुषः श्रेयः प्राप्तुं सुखानि च ॥ २२

विश्वेश्वरमजं देवं जगतः प्रभुमव्ययम् ।
भजन्ति ये पुष्कराक्षं न ते यान्ति पराभवम् ॥ २३

न ते यान्ति पराभवं ओं नम इति ॥

अर्जुन उवाच –

पद्मपत्रविशालाक्ष पद्मनाभ सुरोत्तम ।

भक्तानामनुरक्तानां त्राता भव जनार्दन ॥ २४

श्रीभगवानुवाच –

यो मां नामसहस्त्रेण स्तोतुमिच्छति पाण्डव ।
सोऽहमेकेन श्लोकेन स्तुत एव न संशयः ॥ २५

स्तुत एव न संशय ओं नम इति ॥

व्यास उवाच –

वासनाद्वासुदेवस्य वासितं भुवनत्रयम् ।
सर्वभूतनिवासोऽसि वासुदेव नमोऽस्तु ते ॥ २६

श्रीवासुदेव नमोऽस्तु त ओं नम इति ॥

पार्वत्युवाच –

केनोपायेन लघुना विष्णोर्नामसहस्त्रकम् ।
पठ्यते पण्डितैर्नित्यं श्रोतुमिच्छाम्यहं प्रभो ॥ २७

ईश्वर उवाच –

श्रीराम राम रामेति रमे रामे मनोरमे ।
सहस्त्रनाम तत्तुल्यं रामनाम वरानने ॥ २८

श्रीरामनाम वचनम् ओं नम इति ॥

ब्रह्मोवाच –

नमोऽस्त्वनन्ताय सहस्त्रमूर्तये सहस्त्रपादाक्षिशिरोरुबाहवे ।
सहस्त्रनाम्ने पुरुषाय शाश्वते सहस्त्रकोटीयुगधारिणे नमः ॥ २९

सहस्रकोटीयुगधारिण ओं नम इति ॥

सञ्जय उवाच –

यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः ।
तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥ ३०

श्रीभगवानुवाच –

अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते ।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥ ३१

परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्मसंस्थापनार्थाय संभवामि युगे युगे ॥ ३२

आर्ता विषण्णाः शिथिलाश्च भीता घोरेषु च व्याधिषु वर्तमानाः ।
संकीर्त्य नारायणशब्दमात्रं विमुक्तदुःखाः सुखिनो भवन्तु ॥ ३३

आपदामपहर्तारं दातारं सर्वसंपदाम् ।
लोकाभिरामं श्रीरामं भूयो भूयो नमाम्यहम् ॥ १
आर्तानामार्तिहन्तारं भीतानां भीतिनाशनम् ।
द्विषतां कालदण्डं तं रामचन्द्रं नमाम्यहम् ॥ २
अग्रतः पृष्ठतश्चैव पार्श्वतश्च महाबलौ ।
आकर्णपूर्णधन्वानौ रक्षेतां रामलक्ष्मणौ ॥ ३

सन्नद्धः कवची खड्गी चापबाणधरो युवा ।

गच्छन् ममाग्रतो नित्यं रामः पातु सलक्ष्मणः ॥ ४

नमः कोदण्डहस्ताय सन्धीकृतशराय च ।
खण्डिताखिलदैत्याय रामायापन्निवारिणे ॥ ५

रामाय रामभद्राय रामचन्द्राय वेधसे ।
रघुनाथाय नाथाय सीतायाः पतये नमः ॥ ६

अच्युतानन्तगोविन्दनामोच्चारणभेषजात् ।
नश्यन्ति सकला रोगाः सत्यं सत्यं वदाम्यहम् ॥ ७

अच्युतानन्तगोविन्द विष्णो नारायणामृत ।
रोगान्मे नाशयाशेषानाशु धन्वन्तरे हरे ॥ ८

यज्ञेशाच्युत गोविन्द माधवानन्त केशव ।
कृष्ण विष्णो हृषीकेश वासुदेव नमोऽस्तु ते ॥ ९

श्रीकृष्ण विष्णो नृहरे मुरारे प्रद्युम्न संकर्षण वासुदेव ।
अजानिरुद्धामल विश्वरूप त्वं पाहि नः सर्वभयादजस्रम् ॥

आलोड्य सर्वशास्त्राणि विचार्य च पुनः पुनः ।
इदमेकं सुनिष्पन्नं ध्येयो नारायणो हरिः ॥ ११

यदक्षरपदभ्रष्टं मात्राहीनं तु यद्भवेत् ।
तत्सर्वं क्षम्यतां देव नारायण नमोऽस्तु ते ॥ १२

कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वा प्रकृतेः स्वभावात् ।
करोमि यद्यत् सकलं परस्मै नारायणायेति समर्पयामि ॥

ॐ विश्वस्मै नमः ।

ॐ विष्णवे नमः ।

ॐ वषट्काराय नमः ।

ॐ भूतभव्यभवत्प्रभवे नमः ।

ॐ भूतकृते नमः ।

ॐ भूतभृते नमः ।

ॐ भावाय नमः ।

ॐ भूतात्मने नमः ।

ॐ भूतभावनाय नमः ।

ॐ पूतात्मने नमः । १०

ॐ परमात्मने नमः ।

ॐ मुक्तानां परमागतये नमः ।

ॐ अव्ययाय नमः ।

ॐ पुरुषाय नमः ।

ॐ साक्षिणे नमः ।

ॐ क्षेत्रज्ञाय नमः ।

ॐ अक्षराय नमः ।

ॐ योगाय नमः ।

ॐ योगविदां नेत्रे नमः ।
ॐ प्रधानपुरुषेश्वराय नमः । २०
ॐ नारसिंहवपुषे नमः ।
ॐ श्रीमते नमः ।
ॐ केशवाय नमः ।
ॐ पुरुषोत्तमाय नमः ।
ॐ सर्वस्मै नमः ।
ॐ शर्वाय नमः ।
ॐ शिवाय नमः ।
ॐ स्थाणवे नमः ।

ॐ भूतादये नमः ।
ॐ निधयेऽव्ययाय नमः । ३०
ॐ संभवाय नमः ।
ॐ भावनाय नमः ।
ॐ भर्त्रे नमः ।
ॐ प्रभवाय नमः ।
ॐ प्रभवे नमः ।
ॐ ईश्वराय नमः ।
ॐ स्वयंभुवे नमः ।
ॐ शंभवे नमः ।

ॐ आदित्याय नमः ।
ॐ पुष्कराक्षाय नमः ।४०
ॐ महास्वनाय नमः ।
ॐ अनादिनिधनाय नमः ।
ॐ धात्रे नमः ।
ॐ विधात्रे नमः ।
ॐ धातवे उत्तमाय नमः ।
ॐ अप्रमेयाय नमः ।
ॐ हृषीकेशाय नमः ।
ॐ पद्मनाभाय नमः ।
ॐ अमरप्रभवे नमः ।
ॐ विश्वकर्मणे नम : ।५०
ॐ मनवे नमः ।
ॐ त्वष्ट्रे नमः ।
ॐ स्थविष्ठाय नमः ।
ॐ स्थविराय ध्रुवाय नमः ।
ॐ अग्राह्याय नमः ।
ॐ शाश्वताय नमः ।

ॐ कृष्णाय नमः ।
ॐ लोहिताक्षाय नमः ।
ॐ प्रतर्दनाय नमः ।
ॐ प्रभूताय नमः ।६०
ॐ त्रिककुब्धाम्ने नमः ।
ॐ पवित्राय नमः ।
ॐ मङ्गलाय परस्मै नमः ।
ॐ ईशानाय नमः ।
ॐ प्राणदाय नमः ।
ॐ प्राणाय नमः ।

ॐ ज्येष्ठाय नमः ।
ॐ श्रेष्ठाय नमः ।
ॐ प्रजापतये नमः ।
ॐ हिरण्यगर्भाय नमः ।७०
ॐ भूगर्भाय नमः ।
ॐ माधवाय नमः ।
ॐ मधुसूदनाय नमः ।
ॐ ईश्वराय नमः ।
ॐ विक्रमिणे नमः ।
ॐ धन्विने नमः ।

ॐ मेधाविने नमः ।
ॐ विक्रमाय नमः ।
ॐ क्रमाय नमः ।
ॐ अनुत्तमाय नमः ।८०
ॐ दुराधर्षाय नमः ।
ॐ कृतज्ञाय नमः ।
ॐ कृतये नमः ।
ॐ आत्मवते नमः ।
ॐ सुरेशाय नमः ।
ॐ शरणाय नमः ।
ॐ शर्मणे नमः ।
ॐ विश्वरेतसे नमः ।
ॐ प्रजाभवाय नमः ।
ॐ अह्ने नमः ।९०
ॐ संवत्सराय नमः ।
ॐ व्यालाय नमः ।
ॐ प्रत्ययाय नमः ।
ॐ सर्वदर्शनाय नमः ।

ॐ अजाय नमः ।
ॐ सर्वेश्वराय नमः ।
ॐ सिद्धाय नमः ।
ॐ सिद्धये नमः ।
ॐ सर्वादये नमः ।
ॐ अच्युताय नमः । १००
ॐ वृषाकपये नमः ।
ॐ अमेयात्मने नमः ।
ॐ सर्वयोगविनिःसृताय नमः ।
ॐ वसवे नमः ।

ॐ वसुमनसे नमः ।
ॐ सत्याय नमः ।
ॐ समात्मने नमः ।
ॐ असंमिताय नमः ।
ॐ समाय नमः ।
ॐ अमोघाय नमः । ११०
ॐ पुण्डरीकाक्षाय नमः ।
ॐ वृषकर्मणे नमः ।
ॐ वृषाकृतये नमः ।
ॐ रुद्राय नमः ।

ॐ बहुशिरसे नमः ।
ॐ बभ्रवे नमः ।
ॐ विश्वयोनये नमः ।
ॐ शुचिश्रवसे नमः ।
ॐ अमृताय नमः ।
ॐ शाश्वतस्थाणवे नमः । १२०
ॐ वरारोहाय नमः ।
ॐ महातपसे नमः ।
ॐ सर्वगाय नमः ।
ॐ सर्वविद्भानवे नमः ।
ॐ विष्वक्सेनाय नमः ।
ॐ जनार्दनाय नमः ।
ॐ वेदाय नमः ।
ॐ वेदविदे नमः ।
ॐ अव्यङ्गाय नमः ।
ॐ वेदाङ्गाय नमः । १३०
ॐ वेदविदे नमः ।
ॐ कवये नमः ।

ॐ लोकाध्यक्षाय नमः ।
ॐ सुराध्यक्षाय नमः ।
ॐ धर्माध्यक्षाय नमः ।
ॐ कृताकृताय नमः ।
ॐ चतुरात्मने नमः ।
ॐ चतुर्व्यूहाय नमः ।
ॐ चतुर्दंष्ट्राय नमः ।
ॐ चतुर्भुजाय नमः ।१४०
ॐ भ्राजिष्णवे नमः ।
ॐ भोजनाय नमः ।

ॐ भोक्त्रे नमः ।
ॐ सहिष्णवे नमः ।
ॐ जगदादिजाय नमः ।
ॐ अनघाय नमः ।
ॐ विजयाय नमः ।
ॐ जेत्रे नमः ।
ॐ विश्वयोनये नमः ।
ॐ पुनर्वसवे नमः ।१५०
ॐ उपेन्द्राय नमः ।
ॐ वामनाय नमः ।

ॐ प्रांशवे नमः ।
ॐ अमोघाय नमः ।
ॐ शुचये नमः ।
ॐ ऊर्जिताय नमः ।
ॐ अतीन्द्राय नमः ।
ॐ संग्रहाय नमः ।
ॐ सर्गाय नमः ।
ॐ धृतात्मने नमः । १६०
ॐ नियमाय नमः ।
ॐ यमाय नमः ।
ॐ वेद्याय नमः ।
ॐ वैद्याय नमः ।
ॐ सदायोगिने नमः ।
ॐ वीरन्हन्त्रे नमः ।
ॐ माधवाय नमः ।
ॐ मधवे नमः ।
ॐ अतीन्द्रियाय नमः ।
ॐ महामायाय नमः । १७०

ॐ महोत्साहाय नमः ।
ॐ महाबलाय नमः ।
ॐ महाबुद्धये नमः ।
ॐ महावीर्याय नमः ।
ॐ महाशक्तये नमः ।
ॐ महाद्युतये नमः ।
ॐ अनिर्देश्यवपुषे नमः ।
ॐ श्रीमते नमः ।
ॐ अमेयात्मने नमः ।
ॐ महाद्रिधृते नमः । १८०

ॐ महेष्वासाय नमः ।
ॐ महीभर्त्रे नमः ।
ॐ श्रीनिवासाय नमः ।
ॐ सतां गतये नम ।:
ॐ अनिरुद्धाय नमः ।
ॐ सु_रानन्दाय नमः ।
ॐ गोविन्दाय नमः ।
ॐ गोविदां पतये नमः ।
ॐ मरीचये नमः ।
ॐ दमनाय नमः । १९०

ॐ हंसाय नमः ।
ॐ सुपर्णाय नमः ।
ॐ भुजगोत्तमाय नमः ।
ॐ हिरण्यनाभाय नमः ।
ॐ सुतपसे नमः ।
ॐ पद्मनाभाय नमः ।
ॐ प्रजापतये नमः ।
ॐ अमृत्यवे नमः ।
ॐ सर्वदृशे नमः ।
ॐ सिंहाय नमः । २००
ॐ संधात्रे नमः ।
ॐ संधिमते नमः ।
ॐ स्थिराय नमः ।
ॐ अजाय नमः ।
ॐ दुर्मर्षणाय नमः ।
ॐ शास्त्रे नमः ।
ॐ विश्रुतात्मने नमः ।
ॐ सुरारिहन्त्रे नमः ।

ॐ गुरवे नमः ।
ॐ गुरुतमाय नमः । २१०
ॐ धाम्ने नमः ।
ॐ सत्याय नमः ।
ॐ सत्यपराक्रमाय नमः ।
ॐ निमिषाय नमः ।
ॐ अनिमिषाय नमः ।
ॐ स्त्रग्विणे नमः ।
ॐ वाचस्पतये उदारधिये नमः ।
ॐ अग्रण्ये नमः ।

ॐ ग्रामण्ये नमः ।
ॐ श्रीमते नमः । २२०
ॐ न्यायाय नमः ।
ॐ नेत्रे नमः ।
ॐ समीरणाय नमः ।
ॐ सहस्त्रमूर्धे नमः ।
ॐ विश्वात्मने नमः ।
ॐ सहस्त्राक्षाय नमः ।
ॐ सहस्त्रपदे नमः ।
ॐ आवर्तनाय नमः ।

ॐ निवृत्तात्मने नमः ।
ॐ संवृताय नमः । २३०
ॐ संप्रमर्दनाय नमः ।
ॐ अहःसंवर्मकाय नमः ।
ॐ वह्नये नमः ।
ॐ अनिलाय नमः ।
ॐ धरणीधराय नमः ।
ॐ सुप्रसादाय नमः ।
ॐ प्रसन्नात्मने नमः ।

ॐ विश्वधृषे नमः ।
ॐ विश्वभुजे नमः ।
ॐ विभवे नमः । २४०
ॐ सत्कर्त्रे नमः ।
ॐ सत्कृताय नमः ।
ॐ साधवे नमः ।
ॐ जह्नवे नमः ।
ॐ नारायणाय नमः ।
ॐ नंराय नमः ।

ॐ असंख्येयाय नमः ।
ॐ अप्रमेयात्मने नमः ।
ॐ विशिष्टाय नमः ।
ॐ शिष्टकृते नमः ।२५०
ॐ शुचये नमः ।
ॐ सिद्धार्थाय नमः ।
ॐ सिद्धसंकल्पाय नमः ।
ॐ सिद्धिदाय नमः ।
ॐ सिद्धिसाधनाय नमः ।
ॐ वृषाहिणे नमः ।

ॐ वृषभाय नमः ।
ॐ विष्णवे नमः ।
ॐ वृषपर्वणे नमः ।
ॐ वृषोदराय नमः ।२६०
ॐ वर्धनाय नमः ।
ॐ वर्धमानाय नमः ।
ॐ विविक्ताय नमः ।
ॐ श्रुतिसागराय नमः ।
ॐ सुभुजाय नमः ।
ॐ दुर्धराय नमः ।

ॐ वाग्मिने नमः ।
ॐ महेन्द्राय नमः ।
ॐ वसुदाय नमः ।
ॐ वसवे नमः । २७०
ॐ नैकरूपाय नमः ।
ॐ बृहद्रूपाय नमः ।
ॐ शिपिविष्टाय नमः ।
ॐ प्रकाशनाय नमः ।
ॐ ओजस्तेजोद्युतिधराय नमः ।

ॐ प्रकाशात्मने नमः ।
ॐ प्रतापनाय नमः ।
ॐ ऋद्धाय नमः ।
ॐ स्पष्टाक्षराय नमः ।
ॐ मन्त्राय नमः । २८०
ॐ चन्द्रांशवे नमः ।
ॐ भास्करद्युतये नमः ।
ॐ अमृतांशूद्भवाय नमः ।
ॐ भानवे नमः ।

ॐ शशविन्द्वे नमः ।
ॐ सुरेश्वराय नमः ।
ॐ औषधाय नमः ।
ॐ जगतः सेतवे नमः ।
ॐ सत्यधर्मपराक्रमाय नमः ।
ॐ भूतभव्यभवन्नाथाय नमः ।
ॐ पवनाय नमः ।
ॐ पावनाय नमः ।
ॐ अनलाय नमः ।
ॐ कामहन्त्रे नमः ।

ॐ कामकृते नमः ।
ॐ कान्ताय नमः ।
ॐ कामाय नमः ।
ॐ कामप्रदाय नमः ।
ॐ प्रभवे नमः ।
ॐ युगादिकृते नमः । ३००
ॐ युगावर्त्ताय नमः ।
ॐ नैकमायाय नमः ।
ॐ महाशनाय नमः ।
ॐ अदृश्याय नमः ।

ॐ व्यक्तरूपाय नमः ।

ॐ सहस्रजिते नमः ।

ॐ अनन्तजिते नमः ।

ॐ इष्टाय नमः ।

ॐ अविशिष्टाय नमः ।

ॐ शिष्टेष्टाय नमः ।३१०

ॐ शिखण्डिने नमः ।

ॐ नहुषाय नमः ।

ॐ वृषाय नमः ।

ॐ क्रोधन्हन्त्रे नमः ।

ॐ क्रोधकृत्कर्त्रे नमः ।

ॐ विश्ववाहवे नमः ।

ॐ महीधराय नमः ।

ॐ अच्युताय नमः ।

ॐ प्रथिताय नमः ।

ॐ प्राणाय नमः ।३२०

ॐ प्राणदाय नमः ।

ॐ वासवानुजाय नमः ।

ॐ अपांनिधये नमः ।
ॐ अधिष्ठानाय नमः ।
ॐ अप्रमत्ताय नमः ।
ॐ प्रतिष्ठिताय नमः ।
ॐ स्कन्दाय नमः ।
ॐ स्कन्दधराय नमः ।
ॐ धुर्याय नमः ।
ॐ वरदाय नमः । ३३०
ॐ वायुवाहनाय नमः ।
ॐ वासुदेवाय नमः ।

ॐ बृहद्भानवे नमः ।
ॐ आदिदेवाय नमः ।
ॐ पुरन्दराय नमः ।
ॐ अशोकाय नमः ।
ॐ तारणाय नमः ।
ॐ ताराय नमः ।
ॐ शूराय नमः ।
ॐ शौरये नमः । ३४०
ॐ जनेश्वराय नमः ।
ॐ अनुकूलाय नमः ।

ॐशतावर्ताय नमः ।
ॐ पद्मिने नमः ।
ॐ पद्मनिभेक्षणाय नमः ।
ॐ पद्मनाभाय नमः ।
ॐ अरविन्दाक्षाय नमः ।
ॐ पद्मगर्भाय नमः ।
ॐ शरीरभृते नमः ।
ॐ महर्द्धये नमः । ३५०
ॐ ऋद्धाय नमः ।
ॐ वृद्धात्मने नमः ।
ॐ महाक्षाय नमः ।
ॐ गरुडध्वजाय नमः ।
ॐ अतुलाय नमः ।
ॐ शरभाय नमः ।
ॐ भीमाय नमः ।
ॐ समयज्ञाय नमः ।
ॐ हविर्हरये नमः ।
ॐ सर्वलक्षणलक्षण्याय नमः ।

ॐ लक्ष्मीवते नमः ।
ॐ समितिञ्जयाय नमः ।
ॐ विंक्षराय नमः ।
ॐ रोहिताय नमः ।
ॐ मार्गाय नमः ।
ॐ हेतवे नमः ।
ॐ दामोदराय नमः ।
ॐ सहाय नमः ।
ॐ महीधराय नमः ।
ॐ महाभागाय नमः ।३७०

ॐ वेगवते नमः ।
ॐ अमिताशनाय नमः ।
ॐ उद्भवाय नमः ।
ॐ क्षोभणाय नमः ।
ॐ देवाय नमः ।
ॐ श्रीगर्भाय नमः ।
ॐ परमेश्वराय नमः ।
ॐ करणाय नमः ।
ॐ कारणाय नमः ।
ॐ कर्त्रे नमः ।३८०

ॐ विकर्त्रे नमः ।
ॐ गहनाय नमः ।
ॐ गुहाय नमः ।
ॐ व्यवसायाय नमः ।
ॐ व्यवस्थानाय नमः ।
ॐ संस्थानाय नमः ।
ॐ स्थानदाय नमः ।
ॐ ध्रुवाय नमः ।
ॐपरर्द्धये ।

ॐ परमस्पष्टाय नमः । ३९०
ॐ तुष्टाय नमः ।
ॐ पुष्टाय नमः ।
ॐ शुभेक्षणाय नमः ।
ॐ रामाय नमः ।
ॐ विरामाय नमः ।
ॐ विरजाय नमः ।
ॐ मार्गाय नमः ।
ॐ मेधाय नमः ।

ॐ नयाय नमः ।
ॐ अनयाय नमः ।४००
ॐ वीराय नमः ।
ॐ शक्तिमतां श्रेष्ठाय नमः ।
ॐ धर्माय नमः ।
ॐ धर्मविदुत्तमाय नमः ।
ॐ वैकुण्ठाय नमः ।
ॐ पुरुषाय नमः ।
ॐ प्राणाय नमः ।
ॐ प्राणदाय नमः ।

ॐ प्रणवाय नमः ।
ॐ पृथवे नमः ।४१०
ॐ हिरण्यगर्भाय नमः ।
ॐ शत्रुघ्नाय नम ।:
ॐ व्याप्ताय नमः ।
ॐ वायवे नमः ।
ॐ अधोक्षजाय नमः ।
ॐ ऋतवे नमः ।
ॐ सुदर्शनाय नमः ।
ॐ कालाय नमः ।

ॐ परमेष्ठिने नमः ।
ॐ परिग्रहाय नमः । ४२०
ॐ उग्राय नमः ।
ॐ संवत्सराय नमः ।
ॐ दक्षाय नमः ।
ॐ विश्रामाय नमः ।
ॐ विश्वदक्षिणाय नमः ।
ॐ विस्ताराय नमः ।
ॐ स्थावरस्थाणवे नमः ।

ॐ प्रमाणाय नमः ।
ॐ बीजायाव्ययाय नमः ।
ॐ अर्थाय नमः । ४३०
ॐ अनर्थाय नमः ।
ॐ महाकोशाय नमः ।
ॐ महाभोगाय नमः ।
ॐ महाधनाय नमः ।
ॐ अनिर्विण्णाय नमः ।
ॐ स्थविष्ठाय नमः ।

ॐ अभुवे नमः ।
ॐ धर्मयूपाय नमः ।
ॐ महामखाय नमः ।
ॐ नक्षत्रनेमये नमः ।४४०
ॐ नक्षत्रिये नमः ।
ॐ क्षमाय नमः ।
ॐ क्षामाय नमः ।
ॐ समीहनाय नमः ।
ॐ यज्ञाय नमः ।
ॐ इज्याय नमः ।

ॐ महेज्याय नमः ।
ॐ क्रतवे नमः ।
ॐ सत्राय नमः ।
ॐ सतां गतये नमः । ४५०
ॐ सर्वदर्शिने नमः ।
ॐ विमुक्तात्मने नमः ।
ॐ सर्वज्ञाय नमः ।
ॐ ज्ञानमुत्तमाय नमः ।
ॐ सुव्रताय नमः ।
ॐ सुमुखाय नमः ।

ॐ सूक्ष्माय नमः ।
ॐ सुघोषाय नमः ।
ॐ सुखदाय नमः ।
ॐ सुहृदे नमः । ४६०
ॐ मनोहराय नमः ।
ॐ जितक्रोधाय नमः ।
ॐ वीरबाहवे नमः ।
ॐ विदारणाय नमः ।
ॐ स्वापनाय नमः ।

ॐ स्ववशाय नम ।
ॐ व्यापिने नमः ।
ॐ नैकात्मने नमः ।
ॐ नैककर्मकृते नमः ।
ॐ वत्सराय नमः । ४७०
ॐ वत्सलाय नमः ।
ॐ वत्सिने नमः ।
ॐ रत्नगर्भाय नमः ।
ॐ धनेश्वराय नमः ।

ॐ धर्मगुपे नमः ।
ॐ धर्मकृते नमः ।
ॐ धर्मिणे नमः ।
ॐ सते नमः ।
ॐ असते नमः ।
ॐ क्षराय नमः । ४८०
ॐ अक्षराय नमः ।
ॐ अविज्ञात्रे नमः ।
ॐ सहस्रांशवे नमः ।
ॐ विधात्रे नमः ।

ॐ कृतलक्षणाय नमः ।
ॐ गभस्तिनेमये नमः ।
ॐ सत्त्वस्थाय नमः ।
ॐ सिंहाय नमः ।
ॐ भूतमहेश्वराय नमः ।
ॐ आदिदेवाय नमः । ४९०
ॐ महादेवाय नमः ।
ॐ देवेशाय नमः ।
ॐ देवभृद्गुरवे नमः ।
ॐ उत्तराय नमः ।

ॐ गोपतये नमः ।

ॐ गोप्त्रे नमः ।

ॐ ज्ञानगम्याय नमः ।

ॐ पुरातनाय नमः ।

ॐ शरीरभूतभृते नमः ।

ॐ भोक्त्रे नमः ।५००

ॐ कपीन्द्राय नमः ।

ॐ भूरिदक्षिणाय नमः ।

ॐ सोमपाय नमः ।

ॐ अमृतपाय नमः ।

ॐ सोमाय नमः ।

ॐ पुरुजिते नमः ।

ॐ पुरुसत्तमाय नमः ।

ॐ विनयाय नमः ।

ॐ नयाय नमः ।

ॐ सत्यसंधाय नमः ।५१०

ॐ दाशार्हाय नमः ।

ॐ सात्वतां पतये नमः ।

ॐ जीवाय नमः ।
ॐ विनयितासाक्षिणे नमः ।
ॐ मुकुन्दाय नमः ।
ॐ अमितविक्रमाय नमः ।
ॐ अम्भोनिधये नमः ।
ॐ अनन्तात्मने नमः ।
ॐ महोदधिशयाय नमः ।
ॐ अन्तकाय नमः । ५२०
ॐ अजाय नमः ।

ॐ महार्हाय नमः ।

ॐ स्वाभाव्याय नमः ।
ॐ जितामित्राय नमः ।
ॐ प्रमोदनाय नमः ।
ॐ आनन्दाय नमः ।
ॐ नन्दनाय नमः ।
ॐ नन्दाय नमः ।
ॐ सत्यधर्मणे नमः ।
ॐ त्रिविक्रमाय नमः । ५३०
ॐ महर्षये नमः ।
ॐ कपिलाचार्याय नमः ।

ॐ कृतज्ञाय नमः ।
ॐ मेदिनीपतये नमः ।
ॐ त्रिपदाय नमः ।
ॐ त्रिदशाध्यक्षाय नमः ।
ॐ महाशृङ्गाय नमः ।
ॐ कृतान्तकृते नमः ।
ॐ महावराहाय नमः ।
ॐ गोविन्दाय नमः ।५४०
ॐ सुषेणाय नमः ।

ॐ कनकाङ्गदिने नमः ।
ॐ गुह्याय नमः ।
ॐ गभीराय नमः ।
ॐ गहनाय नमः ।
ॐ गुप्ताय नमः ।
ॐ चक्रगदाधराय नमः ।
ॐ वेधसे नमः ।
ॐ स्वाङ्गाय नमः ।
ॐ अजिताय नमः ।५५०

ॐ कृष्णाय नमः ।
ॐ दृढाय नमः ।
ॐ सङ्कर्षणायाच्युताय नमः ।
ॐ वरुणाय नमः ।
ॐ वारुणाय नमः ।
ॐ वृक्षाय नमः ।
ॐ पुष्कराक्षाय नमः ।
ॐ महामनसे नमः ।
ॐ भगवते नमः ।
ॐ भगघ्ने नमः । ५६०

ॐ आनन्दिने नमः ।
ॐ वनमालिने नमः ।
ॐ हलायुधाय नमः ।
ॐ आदित्याय नमः ।
ॐ ज्योतिरादित्याय नमः ।
ॐ सहिष्णवे नमः ।
ॐ गतिसत्तमाय नमः ।
ॐ सुधन्वने नमः ।
ॐ खण्डपरशवे नमः ।
ॐ दारुणाय नमः । ५७०

ॐ द्रविणप्रदाय नमः ।
ॐ दिवःस्पृशे नमः ।
ॐ सर्वदृग्व्यासाय नमः ।
ॐ वाचस्पतयेऽयोनिजाय नमः ।
ॐ त्रिसाम्ने नमः ।
ॐ सामगाय नमः ।
ॐ साम्ने नमः ।
ॐ निर्वाणाय नमः ।
ॐ भेषजाय नमः ।

ॐ भिषजे नमः ।
ॐ संन्यासकृते नमः ।
ॐ शमाय नमः ।
ॐ शान्ताय नमः ।
ॐ निष्ठायै नमः ।
ॐ शान्तये नमः ।
ॐ परायणाय नमः ।
ॐ शुभाङ्गाय नमः ।
ॐ शान्तिदाय नमः ।

ॐ त्वष्ट्रे नमः ।
ॐ कुमुदाय नमः । ५९०
ॐ कूवलेशयाय नमः ।
ॐ गोहिताय नमः ।
ॐ गोपतये नमः ।
ॐ गोप्त्रे नमः ।
ॐ वृषभाक्षाय नमः ।
ॐ वृषप्रियाय नमः ।
ॐ अनिवर्तिने नमः ।
ॐ निवृत्तात्मने नमः ।
ॐ संक्षेप्त्रे नमः ।
ॐ क्षेमकृते नमः । ६००
ॐ शिवाय नमः ।
ॐ श्रीवत्सवक्षसे नमः ।
ॐ श्रीवासाय नमः ।
ॐ श्रीपतये नमः ।
ॐ श्रीमतां वराय नमः ।
ॐ श्रीदाय नमः ।
ॐ श्रीशाय नमः ।
ॐ श्रीनिवासाय नमः ।

ॐ श्रीनिधये नमः ।
ॐ श्रीविभावनाय नमः ।६१०
ॐ श्रीधराय नमः ।
ॐ श्रीकराय नमः ।
ॐ श्रेयसे नमः ।
ॐ श्रीमते नमः ।
ॐ लोकत्रयाश्रयाय नमः ।
ॐ स्वक्षाय नमः ।
ॐ स्वङ्गाय नमः ।
ॐ शतानन्दाय नमः ।
ॐ नन्दये नमः ।
ॐ ज्योतिर्गणेश्वराय नमः ।६२०
ॐ विजितात्मने नमः ।
ॐ अविधेयात्मने नमः ।
ॐ सत्कीर्तये नमः ।
ॐ छिन्नसंशयाय नमः ।
ॐ उदीर्णाय नमः ।
ॐ सर्वतश्चक्षुषे नमः ।

ॐ अनीशाय नमः ।
ॐ शाश्वतस्थिराय नमः ।
ॐ भूशयाय नमः ।
ॐ भूषणाय नमः । ६३०
ॐ भूतये नमः ।
ॐ विशोकाय नमः ।
ॐ शोकनाशनाय नमः ।
ॐ अर्चिष्मते नमः ।
ॐ अर्चिताय नमः ।
ॐ कुम्भाय नमः ।

ॐ विशुद्धात्मने नमः ।
ॐ विशोधनाय नमः ।
ॐ अनिरुद्धाय नमः ।
ॐ अप्रतिरथाय नमः । ६४०
ॐ प्रद्युम्नाय नमः ।
ॐ अमितविक्रमाय नमः ।
ॐ कालनेमिनिन्हन्त्रे नमः ।
ॐ वीराय नमः ।
ॐ शौरये नमः ।
ॐ शूरजनेश्वराय नमः ।

ॐ त्रिलोकात्मने नमः ।
ॐ त्रिलोकेशाय नमः ।
ॐ केशवाय नमः ।
ॐ केशिन्हन्त्रे नमः । ६५०
ॐ हरये नमः ।
ॐ कामदेवाय नमः ।
ॐ कामपालाय नमः ।
ॐ कामिने नमः ।
ॐ कान्ताय नमः ।

ॐ कृतागमाय नमः ।
ॐ अनिर्देश्यवपुषे नमः ।
ॐ विष्णवे नमः ।
ॐ वीराय नमः ।
ॐ अनन्ताय नमः । ६६०
ॐ धनञ्जयाय नमः ।
ॐ ब्रह्मण्याय नमः ।
ॐ ब्रह्मकृते नमः ।
ॐ ब्रह्मणे नमः ।

ॐ ब्रह्मणे नमः ।
ॐ ब्रह्मविवर्धनाय नमः ।
ॐ ब्रह्मविदे नमः ।
ॐ ब्राह्मणाय नमः ।
ॐ ब्रह्मिणे नमः ।
ॐ ब्रह्मज्ञाय नमः । ६७०
ॐ ब्राह्मणप्रियाय नमः ।
ॐ महाक्रमाय नमः ।
ॐ महाकर्मणे नमः ।
ॐ महातेजसे नमः ।

ॐ महोरगाय नमः ।
ॐ महाक्रतवे नमः ।
ॐ महायज्वने नमः ।
ॐ महायज्ञाय नमः ।
ॐ महाहविषे नमः ।
ॐ स्तव्याय नमः । ६८०
ॐ स्तवप्रियाय नमः ।
ॐ स्तोत्राय नमः ।
ॐ स्तुतये नमः ।
ॐ स्तोत्रे नमः ।

ॐ रणप्रियाय नमः ।
ॐ पूर्णाय नमः ।
ॐ पूरयित्रे नमः ।
ॐ पुण्याय नमः ।
ॐ पुण्यकीर्तये नमः ।
ॐ अनामयाय नमः । ६९०
ॐ मनोजवाय नमः ।
ॐ तीर्थकराय नमः ।
ॐ वसुरेतसे नमः ।
ॐ वसुप्रदाय नमः ।
ॐ वसुप्रदाय नमः ।
ॐ वासुदेवाय नमः ।
ॐ वसवे नमः ।
ॐ वसुमनसे नमः ।
ॐ हविषे नमः ।
ॐ सद्गतये नमः । ७००
ॐ सत्कृतये नमः ।
ॐ सत्तायै नमः ।

ॐ सद्भूतये नमः ।
ॐ सत्परायणाय नमः ।
ॐ शूरसेनाय नमः ।
ॐ यदुश्रेष्ठाय नमः ।
ॐ सन्निवासाय नमः ।
ॐ सुयामुनाय नमः ।
ॐ भूतावासाय नमः ।
ॐ वासुदेवाय नमः । ७१०
ॐ सर्वासुनिलयाय नमः ।
ॐ अनलाय नमः ।

ॐ दर्पन्हन्त्रे नमः ।
ॐ दर्पदाय नमः ।
ॐ दृप्ताय नमः ।
ॐ दुर्धराय नमः ।
ॐ अपराजिताय नमः ।
ॐ विश्वमूर्तये नमः ।
ॐ महामूर्तये नमः ।
ॐ दीप्तमूर्तये नमः । ७२०
ॐ अमूर्तिमते नमः ।
ॐ अनेकमूर्तये नमः ।

ॐ अव्यक्ताय नमः ।
ॐ शतमूर्तये नमः ।
ॐ शताननाय नमः ।
ॐ एकस्मै नमः ।
ॐ नैकस्मै नमः ।
ॐ सवाय नमः ।
ॐ काय नमः ।
ॐ कस्मै नमः ।७३०
ॐ यस्मै नमः ।

ॐ तस्मै नमः ।
ॐ पदायानुत्तमाय नमः ।
ॐ लोकबन्धवे नमः ।
ॐ लोकनाथाय नमः ।
ॐ माधवाय नमः ।
ॐ भक्तवत्सलाय नमः ।
ॐ सुवर्णवर्णाय नमः ।
ॐ हेमाङ्गाय नमः ।
ॐ वराङ्गाय नमः ।७४०

ॐ चन्दनाङ्गदिने नमः ।
ॐ वीनन्हन्त्रे नमः ।
ॐ विषमाय नमः ।
ॐ शून्याय नमः ।
ॐ घृताशिने नमः ।
ॐ अचलाय नमः ।
ॐ चलाय नमः ।
ॐ अमानिने नमः ।
ॐ मानदाय नमः ।
ॐ मान्याय नमः ।७५०

ॐ लोकस्वामिने नमः ।
ॐ त्रिलोकधृते नमः ।
ॐ सुमेधसे नमः ।
ॐ मेधजाय नमः ।
ॐ धन्याय नमः ।
ॐ सत्यमेधसे नमः ।
ॐ धराधराय नमः ।
ॐ तेजोवृषाय नमः ।
ॐ द्युतिधराय नमः ।
ॐ सर्वशस्त्रभृतां वराय नमः ७६०

ॐ प्रग्रहाय नमः ।
ॐ निग्रहाय नमः ।
ॐ व्यग्राय नमः ।
ॐ नैकशृङ्गाय नमः ।
ॐ गदाग्रजाय नमः ।
ॐ चतुर्मूर्तये नमः ।
ॐ चतुर्बाहवे नमः ।
ॐ चतुर्व्यूहाय नमः ।
ॐ चतुर्गतये नमः ।

ॐ चतुरात्मने नमः । ७७०
ॐ चतुर्भावाय नमः ।
ॐ चतुर्वेदविदे नमः ।
ॐ एकपदे नमः ।
ॐ समावर्ताय नमः ।
ॐ अनिवृत्तात्मने नमः ।
ॐ दुर्जयाय नमः ।
ॐ दुरतिक्रमाय नमः ।
ॐ दुर्लभाय नमः ।

ॐ दुर्गमाय नमः ।
ॐ दुर्गाय नमः । ७८०
ॐ दुरावासाय नमः ।
ॐ दुरारिहन्त्रो नमः ।
ॐ शुभाङ्गाय नमः ।
ॐ लोकसारङ्गाय नमः ।
ॐ सुतन्तवे नमः ।
ॐ तन्तुवर्धनाय नमः ।
ॐ इन्द्रकर्मणे नमः ।
ॐ महाकर्मणे नमः ।

ॐ कृतकर्मणे नमः
ॐ कृतागमाय नमः । ७९०
ॐ उद्भवाय नमः ।
ॐ सुन्दराय नमः ।
ॐ सुन्दाय नमः ।
ॐ रत्ननाभाय नमः ।
ॐ सुलोचनाय नमः ।
ॐ अर्काय नमः ।
ॐ वाजसनाय नमः ।
ॐ शृङ्गिणे नमः ।

ॐ जयन्ताय नमः ।
ॐ सर्वज्ञियिने नमः ।८००
ॐ सुवर्णविन्दवे नमः ।
ॐ अक्षोभ्याय नमः ।
ॐ सर्ववागीश्वरेश्वराय नमः ।
ॐ महाह्रदाय नमः ।
ॐ महागर्ताय नमः ।
ॐ महाभूताय नमः ।
ॐ महानिधये नमः ।

ॐ कुमुदाय नमः ।
ॐ कुन्दराय नमः ।
ॐ कुन्दाय नमः ।८१०
ॐ पर्जन्याय नमः ।
ॐ पावनाय नमः ।
ॐ अनिलाय नमः ।
ॐ अमृताशाय नमः ।
ॐ अमृतवपुषे नमः ।
ॐ सर्वज्ञाय नमः ।

ॐ सर्वतोमुखाय नमः ।
ॐ सुलभाय नमः ।
ॐ सुव्रताय नमः ।
ॐ सिद्धाय नमः । ८२०
ॐ शत्रुजिते नमः ।
ॐ शत्रुतापनाय नमः ।
ॐ न्यग्रोधाय नमः ।
ॐ उदुम्बराय नमः ।
ॐ अश्वत्थाय नमः ।
ॐ चाणूरान्ध्रनिषूदनाय नमः ।

ॐ सहस्रार्चिमे नमः ।
ॐ सप्तजिह्वाय नमः ।
ॐ सप्तैधसे नमः ।
ॐ सप्तवाहनाय नमः । ८३०
ॐ अमूर्तये नमः ।
ॐ अनघाय नमः ।
ॐ अचिन्त्याय नमः ।
ॐ भयकृते नमः ।
ॐ भयनाशनाय नमः ।
ॐ अणवे नमः ।

ॐ बृहते नमः ।
ॐ कृशाय नमः ।
ॐ स्थूलाय नमः ।
ॐ गुणभृते नमः ।
ॐ निर्गुणाय नमः ।
ॐ महते नमः ।
ॐ अधृताय नमः ।
ॐ स्वधृताय नमः ।
ॐ स्वास्याय नमः ।

ॐ प्राग्वंशाय नमः ।
ॐ वंशवर्धनाय नमः ।
ॐ भारभृते नमः ।
ॐ कथिताय नमः ।
ॐ योगिने नमः । ८५०
ॐ योगीशाय नमः ।
ॐ सर्वकामदाय नमः ।
ॐ आश्रमाय नमः ।
ॐ श्रमणाय नमः ।

ॐ क्षामाय नमः ।
ॐ सुपर्णाय नमः ।
ॐ वायुवाहनाय नमः ।
ॐ धनुर्धराय नमः ।
ॐ धनुर्वेदाय नमः ।
ॐ दण्डाय नमः ।८६०
ॐ दमयित्रे नमः ।
ॐ दमाय नमः ।
ॐ अपराजिताय नमः ।
ॐ सर्वसहाय नमः ।

ॐ नियन्त्रे नमः ।
ॐ अनियमाय नमः ।
ॐ अयमाय नमः ।
ॐ सत्त्ववते नमः ।
ॐ सात्त्विकाय नमः ।
ॐ सत्याय नमः ।८७०
ॐ सत्यधर्मपरायणाय नमः ।
ॐ अभिप्रायाय नमः ।
ॐ प्रियार्हाय नमः ।
ॐ अर्हाय नमः ।

ॐ प्रियकृते नमः ।
ॐ प्रीतिवर्धनाय नमः ।
ॐ विहायसगतये नमः ।
ॐ ज्योतिषे नमः ।
ॐ सुरुचये नमः ।
ॐ हुतभुजे नमः ।८८०
ॐ विभवे नमः ।
ॐ रवये नमः ।
ॐ विरोचनाय नमः ।

ॐ सूर्याय नमः ।
ॐ सवित्रे नमः ।
ॐ रविलोचनाय नमः ।
ॐ अनन्ताय नमः ।
ॐ हुतभुजे नमः ।
ॐ भोक्त्रे नमः ।
ॐ सुखदाय नमः ।९९०
ॐ नैकजाय नमः ।
ॐ अग्रजाय नमः ।

ॐ अनिर्विण्णाय नमः ।
ॐ सदामर्षिणे नमः ।
ॐ लोकाधिष्ठानाय नमः ।
ॐ अद्भुताय नमः ।
ॐ सनाते नमः ।
ॐ सनातनतमाय नमः ।
ॐ कपिलाय नमः ।
ॐ कपये नमः । १००
ॐ अव्ययाय नमः ।
ॐ स्वस्तिदाय नमः ।

ॐ स्वस्तिकृते नमः ।
ॐ स्वस्तिने नमः ।
ॐ स्वस्तिभुजे नमः ।
ॐ स्वस्तिदक्षिणाय नमः ।
ॐ अरौद्राय नमः ।
ॐ कुण्डलिने नमः ।
ॐ चक्रिणे नमः ।
ॐ विक्रमिणे नमः । ११०
ॐ ऊर्जितशासनाय नमः ।
ॐ शब्दातिगाय नमः ।

ॐ शब्दसहाय नमः ।
ॐ शिशिराय नमः ।
ॐ शर्वरीकराय नमः ।
ॐ अक्रूराय नमः ।
ॐ पेशलाय नमः ।
ॐ दक्षाय नमः ।
ॐ दक्षिणाय नमः ।
ॐ क्षमिणां वराय नमः ।९२०
ॐ विद्वत्तमाय नमः ।

ॐ वीतभयाय नमः ।
ॐ पुण्यश्रवणकीर्तनाय नमः ।
ॐ उत्तारणाय नमः ।
ॐ दुष्कृतिहन्त्रे नमः ।
ॐ पुण्याय नमः ।
ॐ दुःस्वप्ननाशनाय नमः ।
ॐ वीरहन्त्रे नमः ।
ॐ रक्षणाय नमः ।
ॐ सद्भ्यो नमः ।९३०

ॐ जीवनाय नमः ।
ॐ पर्यवस्थिताय नमः ।
ॐ अनन्तरूपाय नमः ।
ॐ अनन्तश्रिये नमः ।
ॐ जितमन्यवे नमः ।
ॐ भयापहाय नमः ।
ॐ चतुरस्त्राय नमः ।
ॐ गभीरात्मने नमः ।
ॐ विदिशाय नमः ।
ॐ व्यादिशाय नमः । ९४०

ॐ दिशाय नमः ।
ॐ अनादये नमः ।
ॐ भुवे नमः ।
ॐ भुवो लक्ष्म्यै नमः ।
ॐ सुवीराय नमः ।
ॐ रुचिराङ्गदाय नमः ।
ॐ जननाय नमः ।
ॐ जनजन्मादये नमः ।
ॐ भीमाय नमः ।
ॐ भीमपराक्रमाय नमः । ९५०

ॐ आधारनिलयाय नमः ।

ॐ अधात्रे नमः ।

ॐ पुष्पहासाय नमः ।

ॐ प्रजागराय नमः ।

ॐ ऊर्ध्वगाय नमः ।

ॐ सत्पथाचाराय नमः ।

ॐ प्राणदाय नमः ।

ॐ प्रणवाय नमः ।

ॐ पणाय नमः ।

ॐ प्रमाणाय नमः । ९६०

ॐ प्राणनिलयाय नमः ।

ॐ प्राणभृते नमः ।

ॐ प्राणजीवनाय नमः ।

ॐ तत्त्वाय नमः ।

ॐ तत्त्वविदे नमः ।

ॐ एकात्मने नमः ।

ॐ जन्ममृत्युजरातिगाय नमः ।

ॐ भूर्भुवःस्वस्तरवे नमः ।

ॐ ताराय नमः ।
ॐ सवित्रे नमः । १७०
ॐ प्रपितामहाय नमः ।
ॐ यज्ञाय नमः ।
ॐ यज्ञपतये नमः ।
ॐ यज्वने नमः ।
ॐ यज्ञाङ्गाय नमः ।
ॐ यज्ञवाहनाय नमः ।
ॐ यज्ञभृते नमः ।
ॐ यज्ञकृते नमः ।
ॐ यज्ञिने नमः ।
ॐ यज्ञभुजे नमः । १८०
ॐ यज्ञसाधनाय नमः ।
ॐ यज्ञान्तकृते नमः ।
ॐ यज्ञगुह्याय नमः ।
ॐ अन्नाय नमः ।
ॐ अन्नादाय नमः ।
ॐ आत्मयोनये नमः ।
ॐ स्वयञ्जाताय नमः ।
ॐ वैखानसाय नमः ।

श्रीविष्णुसहस्रनामस्तोत्रमनामावलिः

ॐ सामगायनाय नमः ।
ॐ देवकीनन्दनाय नमः ।९९०
ॐ स्रष्ट्रे नमः ।
ॐ क्षितीशाय नमः ।
ॐ पापनाशनाय नमः ।
ॐ शङ्खभृते नमः ।
ॐ नन्दकिने नमः ।
ॐ चक्रिणे नमः ।
ॐ शार्ङ्गधन्वने नमः ।
ॐ गदाधराय नमः ।
ॐ रथाङ्गपाणये नमः ।
ॐ अक्षोभ्याय नमः ।
ॐ सर्वप्रहरणायुधाय नमः ।१०००

---

१ अन्नपूर्णासहस्रनामस्तोत्रम् । नामावलीसहितम्
२ गोपालसहस्रनामस्तोत्रम् । नामावलीसहितम्
३ गायत्रीसहस्रनामस्तोत्रम् । नामावलीसहितम्
४ आञ्जनेयसहस्रनामस्तोत्रम् । नामावलीसहितम्
५ कालिकासहस्रनामस्तोत्रम् । नामावलीसहितम्
६ सीतासहस्रनामस्तोत्रम् । नामावलीसहितम्
७ सरस्वतीसहस्रनामस्तोत्रम् । नामावलीसहितम्
८ भवानीसहस्रनामस्तोत्रम् । नामावलीसहितम्
९ श्रीकृष्णसहस्रनामस्तोत्रम् । नामावलीसहितम्
१० लक्ष्मीनृसिंहसहस्रनामस्तोत्रम् । नामावलीसहितम्
११ बालासहस्रनामस्तोत्रम् । नामावलीसहितम्
१२ शनैश्चरसहस्रनामस्तोत्रम् । नामावलीसहितम्
१३ सूर्यसहस्रनामस्तोत्रम् । नामावलीसहितम्
१४ ललितासहस्रनामस्तोत्रम् । नामावलीसहितम्
१५ श्रीललितात्रिशतीस्तोत्रम् ।